विहाय वह्निं नहि वस्तु किञ्चित्
ग्राह्यं परेभ्यः सति सम्भवे च ।
असम्भवे तीर्थवहिर्विशुद्धात्
पर्व्वातिरिक्तं प्रतिगृह्य जप्यात् ॥
तत्रासमर्थोऽनुदिनं विशुद्धात्
याचेत यावद्दिनमात्रभैक्ष्यम् ।
गृह्णाति रागादधिकं न सिद्धिः
प्रजायते कल्पशतैरमुष्य ॥ * ॥
सकृदुच्चरिते शब्दे प्रणवं समुदीरयेत् ।
प्रोक्ते पारशवे शब्दे प्राणायामं समाचरेत् ॥
बहुप्रलापी आचम्य न्यस्याङ्गानि ततो जपेत् ।
क्षुतेऽप्येवं तथास्पृश्यस्थानानां स्पर्शनेन च ॥
एवमादींश्च नियमान् पुरश्चरणकृच्चरेत् ॥
विण्मूत्रोत्सर्गशङ्कादियुक्तः कर्म्म करोति यत् ।
जपार्च्चनादिकं सर्व्वमपवित्रं भवेत्प्रिये ! ॥
मलिनाम्बरकेशादिमुखदौर्गन्ध्यसंयुतः ।
यो जपेत्तं दहत्याशु देवता गुप्तिसंस्थिता ॥
आलस्यं जृम्भणं निद्रां क्षुतं निष्ठीवनं भयम् ।
नीचाङ्गस्पर्शनं कोपं जपकाले विवर्ज्जयेत् ॥ * ॥
एवमुक्तविधानेन विलम्बं त्वरितं विना ।
उक्तसंख्यं जपं कुर्य्यात् पुरश्चरणसिद्धये ॥
देवतागुरुमन्त्राणामैक्यं सम्भावयन् धिया ।
जपेदेकमनाः प्रातःकालं मध्यन्दिनावधि ॥
यत्सङ्ख्यया समारब्धं तत् कर्त्तव्यं दिने दिने ।
यदि न्यूनाधिकं कुर्य्यात् व्रतभ्रष्टो भवेन्नरः ॥”
मुण्डमालायाम् ।
“यत्सङ्ख्यया समारब्धं तत् जप्तव्यं दिने दिने ।
न्यूनाधिकं न कर्त्तव्यमासमाप्तं सदा जपेत् ॥
प्रजपेदुक्तसङ्ख्यायाश्चतुर्गुणजपं कलौ ॥”
अन्यत्रापि ।
“कृते जपस्तु कल्पोक्तस्त्रेतायां द्विगुणो मतः ।
द्वापरे त्रिगुणः प्रोक्तश्चतुर्गुणजपः कलौ ॥”
कुलार्णवेऽपि ।
“न्यूनातिरिक्तकर्म्माणि न फलन्ति कदाचन ।
यथाविधिकृतान्येव सत्कर्म्माणि फलन्ति हि ॥
भूशय्या ब्रह्मचारित्वं मौनमाचार्य्यसेविता ।
नित्यपूजा नित्यदानं देवतास्तुतिकीर्त्तनम् ॥
नित्यं त्रिसवनं स्नानं क्षुद्रकर्म्मविवर्ज्जनम् ।
नैमित्तिकार्च्चनञ्चैव विश्वासो गुरुदेवयोः ॥
जपनिष्ठा द्वादशैते धर्म्माः स्युर्मन्त्रसिद्धिदाः ॥
स्त्रीशूद्रपतितव्रात्यनास्तिकोच्छिष्टभाषणम् ।
असत्यभाषणं जिह्मभाषणं परिवर्ज्जयेत् ॥
सत्यत्रापि न भाषेत जपहोमार्च्चनादिषु ।
अन्यथानुष्ठितं सर्व्वं भवत्येव निरर्थकम् ॥
पुरश्चरणकाले तु यदि स्यान्मृतसूतकम् ।
तथा च कृतसङ्कल्पो व्रतं नैव परित्यजेत् ॥”
योगिनीहृदये ।
“शयीतकुशशय्यायां शुचिवस्त्रधरः सदा ।
प्रत्यहं क्षालयेत् शय्यामेकाकी निर्भयः स्वपेत् ॥
असत्यभाषणं वाचं कुटिलां परिवर्ज्जयेत् ।
वर्ज्जयेद्गीतवाद्यादिश्रवणं नृत्यदर्शनम् ॥
अभ्यङ्गं गन्धलेपञ्च पुष्पधारणमेव च ।
त्यजेदुष्णोदकस्नानमन्यदेवप्रपूजनम् ॥”
तत्रैव ।
“नैकवासा जपेन्मन्त्रं बहुवासाकुलोऽपि वा ॥”
वैशम्पायनसंहितायाम् ।
“विपर्य्यासं स कुर्य्याच्च कदाचिदपि मोहतः ।
उपर्य्यधो वहिर्व्वस्त्रे पुरश्चरणकृन्नरः ॥
पातितानामन्त्यजानां दर्शने भाषणे श्रुते ।
क्षुतेऽधोवायुगमने जृम्भणे जपमुत्सृजेत् ॥
तथा तस्य च तत्प्राप्तौ प्राणायामं षडङ्गकम् ।
कृत्वा सम्यक् जपेत् शेषं यद्वा सूर्य्यादिदर्शनम् ॥”
आदिशब्दाद्वह्निं ब्राह्मणाञ्च ॥ * ॥ तन्त्रान्तरे ।
“मनःसंहरणं शौचं मौनं मन्त्रार्थचिन्तनम् ।
अव्यग्रत्वमनिर्व्वेदो जपसम्पत्तिहेतवः ॥ * ॥
उष्णीषी कञ्चुकी नग्नो मुक्तकेशो गणावृतः ।
अपवित्रकरोऽशुद्धः प्रलपन्न जपेत् क्वचित् ॥
अनासनः शयानो वा गच्छन् भुञ्जान एव वा ।
अप्रावृतौ करौ कृत्वा शिरसा प्रावृतोऽपि वा ॥
चिन्ताव्याकुलचित्तो वा क्षुब्धो भ्रान्तः क्षुधा-
न्वितः ।
रथ्यायामशिवस्थाने न जपेत्तिमिरालये ॥
उपानद्गूढपादो वा यानशय्यागतोऽपि वा ।
प्रसार्य्य न जपेत् पादावुत्कटासन एव च ।
न यज्ञकाष्ठे पाषाणे न भूमौ नासने स्थितः ॥”
तथा ।
“मार्ज्जारं कुक्कुटं क्रौञ्चं श्वानं शूद्रं कपिं खरम् ।
दृष्ट्वाचम्य जपेत् शेषं स्पृष्ट्वा स्नानं विधीयते ॥”
सर्व्वत्र जपे त्वयं नियमः ॥ मानसे तु नियमो
नास्त्येव । तथा च ।
“अशुचिर्व्वा शुचिर्व्वापि गच्छंस्तिष्ठन् स्वपन्नपि ।
मन्त्रैकशरणो विद्वान् मनसैव सदाभ्यसेत् ॥
न दोषो मानसे जाप्ये सर्व्वदेशेऽपि सर्व्वदा ॥”
श्यामादिजपे तु तत्तन्मन्त्रे विशेषो वक्तव्यः ॥
जपफलमाह शिवधर्म्मे ।
“जपनिष्ठो द्विजश्रेष्ठोऽखिलयज्ञफलं लभेत् ।
सर्व्वेषामेव यज्ञानां जायतेऽसौ महाफलः ॥
जपेन देवता नित्यं स्तूयमाना प्रसीदति ।
प्रसन्ना विपुलान् कामान् दद्यान्मुक्तिञ्च शाश्व-
तीम् ॥”
पाद्मे ।
“यक्षरक्षःपिशाचाश्च ग्रहाः सर्पाश्च भीषणाः ।
जापिनं नोपसर्पन्ति भयभीताः समन्ततः ॥”
पाद्मनारदीययोः ।
“यावन्तः कर्म्मयज्ञाः स्युः प्रदिष्टानि तपांसि च ।
सर्व्वे ते जपयज्ञस्य कलां नार्हन्ति षोड़शीम् ॥
माहात्म्यं वाचिकस्यैतज्जपयज्ञस्य कीर्त्तितम् ।
तस्माच्छतगुणोपांशुः सहस्रो मानसः स्मृतः ॥”
तथा तन्त्रे ।
“मानसः सिद्धिकामानां पुष्टिकामैरुपांशुकः ।
वाचिको मारणे चैव प्रशस्तो जप ईरितः ॥”
गौतमीये ।
“अशक्ता त्रिसवनं स्नानमन्यथा द्विः सकृच्च वा ।
त्रिसन्ध्यं प्रजपेन्मन्त्रं पूजनं तत्समं भवेत् ॥”
सन्ध्यात्रये पूजाङ्गत्वाज्जपमष्टोत्तरशतमित्यर्थः ॥
“एकदा वा भवेत् पूजा न जपेत् पूजनं विना ।
जपान्ते वा भवेत् पूजा पूजान्ते वा जपेन्मनुम् ॥
प्रातःकालं समारभ्य जपेन्मध्यन्दिनावधि ॥”
मध्यन्दिनावधीति न नियमपरं किन्त्वधिककाल-
व्यवच्छेदपरम् । अन्यथा तत्समयजपनियमे
कदाचित् जिह्वाया जाड्याजाड्येन वा प्रति-
नियतदिवसीयजपसङ्ख्याया अपूर्णत्वे अधिकत्वे
वा नियमभङ्गः स्यात् ॥ * ॥
“मनः संहृत्य विषयान्मन्त्रार्थगतमानसः ।
न द्रुतं न विलम्बञ्च जपेन्मौक्तिकपंक्तिवत् ॥ * ॥
जपः स्यादक्षरावृत्तिर्मानसोपांशुवाचिकैः ।
धिया यदक्षरश्रेणीं वर्णस्वरपदात्मिकाम् ॥
उच्चरेदर्थमुद्दिश्य मानसः स जपः स्मृतः ॥”
मन्त्रनिर्णये ।
“मानसं मन्त्रवर्णस्य चिन्तनं मानसः स्मृतः ।
जिह्वोष्ठौ चालयेत् किञ्चिद्देवतागतमानसः ॥
किञ्चित् श्रवणयोग्यः स्यात् उपांशुः स जपः
स्मृतः ।
मन्त्रमुच्चारयेद्वाचा वाचिकः स जपः स्मृतः ॥
उच्चैर्जपादिविशिष्टः स्यादुपांशुर्दशभिर्गुणैः ।
जिह्वाजपः शतगुणः सहस्रो मानसः स्मृतः ॥”
प्रकारान्तरम् ।
“निजकर्णागोचरो यो मानसः स जपः स्मृतः ।
उपांशुर्निजकर्णस्य गोचरः स प्रकीर्त्तितः ॥
निगदस्तु जनैर्वेद्यस्त्रिविधोऽयं जपः स्मृतः ॥”
तन्त्रान्तरे ।
“उच्चैर्जपोऽधमः प्रोक्त उपांशुर्म्मध्यमः स्मृतः ।
उत्तमो मानसो देवि ! त्रिविधः कथितो जपः ॥”
जिह्वाजपस्तु ।
“जिह्वाजपः स विज्ञेयः केवलं जिह्वया बुधैरिति ॥
अतिविलम्बातिशीघ्रजपे दोषमाह ।
“अतिह्रस्वो व्याधिहेतुरतिदीर्घो वसुक्षयः ।
अक्षराक्षरसंयुक्तं जपेन्मौक्तिकहारवत् ॥
मनसा यः स्मरेत् स्तोत्रं वचसा वा मनुं जपेत् ।
उभयं निष्फलं याति भिन्नभाण्डोदकं यथा ॥”
गौतमीये ।
“पशुभावे स्थिता मन्त्राः केवला वर्णरूपिणः ।
सौषुम्णध्वन्युच्चरिताः प्रभुत्वं प्राप्नुवन्ति ते ॥”
पाद्मनारदीययोः ।
“मन्त्राक्षराणि चिच्छक्तौ प्रोतानि परिभावयेत् ।
तामेव परमव्योम्नि परमामृतबृंहिते ॥
दर्शयत्यात्मसद्भावं पूजाहोमादिभिर्व्विनेति ।”
गौतमीये दशाक्षरपटले ।
“मूलमन्त्रं प्राणबुद्ध्या सुषुम्नामूलदेशके ।
मन्त्रार्थं तस्य चैतन्यं जीवं ध्यात्वा पुनः पुनः ॥
कुलार्णवेऽपि ।
“मनोऽन्यत्र शिवोऽन्यत्र शक्तिरन्यत्र मारुतः
न सिद्ध्यति वरारोहे ! कल्पकोटिशतैरपि ॥
जातसूतकमादौ स्यादन्ते च मृतसूतकम् ।
सूतकद्वयसंयुक्तो यो मन्त्रः स न सिद्ध्यति ॥
गुरोस्तद्रहितं कृत्वा मन्त्रं यावज्जपेद्धिकः ।